प्रकाशकः -

प्रो. महेन्द्रकुमारः दवे
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

सहसम्पादकः समन्वयकश्च -
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval - 2018*

प्रथमं संस्करणम् - मई - २०१८

प्रतयः - ३५०

ISBN - 978-93-83097-27-2

मूल्यम् - रु. २०० /-

मुद्रकः - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

Shree Somnath Sanskrit University Grantha Series - 10

# VĀKYĀRTHAJYOTIḤ

Year - 2015-16

Issue - 2

Chief Editor
**Pro. Ark Nath Chaudhary**
Vice-Chancellor
Shree Somnath Sanskrit University, Veraval

Editors
**Dr. Pankajkumar Rawal**
**Dr. Satrughna Panigrahi**

**Shree Somnath Sanskrit University - Veraval - Gujarat**

Scanned by CamScanner

| | | |
|---|---|---|
| ११ | संस्कृतसाहित्ये पित्रोः गौरवम्<br>डॉ. डायालाल एम. मोकरिया | १२१-१२५ |
| १२ | ज्यौतिषशास्त्रे नवविधकालमानविचार:<br>डॉ. रमेशचन्द्रबाबूलालशुक्लः | १२६-१३३ |
| १३ | मन्त्रार्थविचार:<br>डॉ. शत्रुघ्नपाणिग्राही | १३४-१४१ |
| १४ | व्याप्तिस्वरूपविचार:<br>डॉ. बी. उमा महेश्वरी | १४२-१५२ |
| १५ | भावविकारसन्दर्भे भावपदार्था:<br>डॉ. दीपेश: विनोद: कतिरा | १५३-१६१ |
| १६ | भारतीयदर्शनेषु पाठसमालोचनपद्धति:<br>डॉ. जानकीशरणः आचार्यः | १६२-१७८ |
| १७ | अनन्योक्तेरन्योक्तेरीषदास्वाद:<br>डॉ. अमृतलालः भोगायता | १७९-१८९ |
| १८ | डॉ. गोस्वामी बलभद्रप्रसाद शास्त्री कृत<br>"इन्दिराजीवनम्" शतककाव्य का शास्त्रीय अध्ययन<br>डॉ. कार्तिकः पण्ड्या | १९०-२०१ |
| १९ | Copyrights in India: An Introduction<br>**Ravindra Suryakant Kale** | २०२-२०८ |


Scanned by CamScanner

# भावविकारसन्दर्भे भावपदार्थः

डॉ. दीपेशः कतिरा
सहायकाचार्यः (व्याकरणम्),
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सारः -

वार्ष्यायणिना आचार्येण 'जायते', 'अस्ति', 'विपरिणमते' इत्यादयः षड् भावविकाराः प्रोक्ताः। त इमे भावविकाराः क्रियाविकारा वा द्रव्यविकारा वा इति जिज्ञासा उदेति। निरुक्तस्य विभिन्नासु टीकासु एतद्विषये यानि मतानि उपस्थापितानि तेषु समन्वयचिकीर्षया भावपदार्थबुभुत्सया चैव प्रकृतेऽध्ययने प्रवृत्तिः।

मुख्यशब्दाः - भावः, षड् भावविकाराः, यास्कः, दुर्गाचार्यः, वाक्यपदीयम्

## १. विषयप्रवेशः -

यास्कप्रणीते निरुक्ते वार्ष्यायणेराचार्यस्य मतं चर्चितं, "षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति" (दृश्यतां भड्कम्कर १९८५: ४४)। वाक्यपदीयेऽपि उक्तम्, "जन्मादयो विकाराः षड् भावभेदस्य योनय" इति (दृश्यतां शुक्ल १९८४: १)। अन्यत्रापि वाक्यपदीये भावविकाराणामुल्लेखो दृश्यते[१]। अतिप्राचीनस्य वार्ष्यायणेराचार्यस्य भावविकारसम्बद्धं मतमिदं भारतीयदर्शनपरम्परायां सुविरूढं वर्तते। अत्र 'भाव'-पदार्थजिज्ञासा जायते।

## २. भावशब्दस्य व्युत्पत्तिः -

भू - सत्तायाम् इत्यस्मात् धातोः घञ्-प्रत्यये कृते भावशब्दो निष्पन्नो भवति। सोऽयं घञ्-प्रत्ययो 'भावे' (अष्टाध्यायी ३.३.१८) इत्यनेन सूत्रेण

Scanned by CamScanner

क्रियते। तत्र काशिका, "भावे वाच्ये धातोः घञ्-प्रत्ययो भवति। पाकः, त्यागः, रागः। क्रियासामान्यवाची भवतिः। तेन अर्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति। धात्वर्थश्च धातुना एव उच्यते। यस्तस्य सिद्धता नाम धर्मः तत्र घञादयः प्रत्यया विधीयन्ते" इति (दृश्यतां काशिका पृ. सं. २८३)। कौमुद्यामपि उक्तम्, "सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्" इति (दृश्यतां शर्मा २००८: ३१३)।

### ३. किं भावो द्रव्यम्?

आचार्येण वार्ष्यायणिना ये भावविकारा उक्तास्ते सर्वेषु द्रव्येषु दरीदृश्यन्ते। सर्वाण्यपि द्रव्याणि जायन्ते, स्थिरीभवन्ति, पुष्यन्ति, विपरिणमन्ते, वर्धन्ते, जीर्यन्ति, विनश्यन्ति च। समग्रे संसारे निरन्तरम् इयं प्रक्रिया प्रवर्तमाना इव भाति। तस्मात् नूनम् इमे द्रव्यस्य विकाराः स्युः इति भाति। अत्र द्रव्यं नाम क्रियेतरत् मूर्तं सत्त्वप्रधानं नामपदवाच्यम्। आचार्येण यास्केन चतुर्णां पदजातानां व्याख्यानवेलायां यथोक्तं, "सत्त्वप्रधानानि नामानि" इति (दृश्यतां भड्कम्कर १९८५: २३)। तत्रैव यद् मूर्तं सत्त्वभूतं भवति तद् द्रव्यम् इति प्रतिपादितम्। उपरि (२) इत्यत्र क्रियावाचिनो भूधातोः सिद्धावस्थाद्योतकस्य घञ्-प्रत्ययस्य योजनेन एव भावशब्दो निष्पन्न इति प्रदर्शितम्। सेयं सिद्धावस्था एव द्रव्यत्वम्। क्रिया अमूर्ता भवति। क्रिया साधनप्रक्रियाद्योतिका भवति। उक्तं च यास्केन, "पूर्वापरीभूतं (=अपरिणिष्ठितं) भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्" इति (दृश्यतां तत्रैव)। "भावप्रधानमाख्यातम्" इत्यत्र आख्यातस्य लक्षणं विवृण्वन् दुर्गाचार्यो वदति, "नामपदवाच्यार्थाश्रयक्रियाव्यङ्ग्यो भावः पाकरागत्यागाख्यः। स यत्र प्रधानं गुणभूता क्रिया तदिदं भावप्रधानम्" इति (दृश्यतां तत्रैव पृ. सं ३७)। भावः (= परिणिष्ठिता क्रिया = द्रव्यम्) प्रधानं यस्मिन् तद् आख्यातम् इति 'भावप्रधानमाख्यातम्' इत्यस्य लक्षणस्य तात्पर्यम् इति

दुर्गाचार्यस्य टीकातः फलति। यतः आख्यातं (= क्रिया) भावेनैव (=द्रव्यसिद्ध्या एव) लक्ष्यते। व्याकरणमहाभाष्येऽपि उक्तम् "कृदभितो भावो द्रव्यवद्भवति" इति (दृश्यताम् कार्दोना २००८: ३६४)।

४. किं भावः क्रिया?

यस्य च भावेन भावलक्षणम् (अष्टाध्यायी २.३.३७) इत्यस्य सूत्रस्य व्याख्याने काशिकाकारो वदति, "भावः क्रिया। यस्य च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति" इति (दृश्यतां काशिका पृ. सं. १६२)। निरुक्तस्य व्याख्याकारेण डॉ. देवेन्द्रनाथ पाण्डेयेनापि उक्तम्, "भवतीति भावः। भावः क्रिया" इति (दृश्यताम् पाण्डेय २०११: ७)। निरुक्तव्याख्याकारेण मुकुन्दझा बक्षी महाभागेनापि उक्तम्, "भावो भावना उत्पादना। सा च असत्त्वभूतो धात्वर्थोऽत्र गृह्यते। इयमेव साध्यत्वेनाभिधीयमाना क्रियेत्युच्यते" इति (दृश्यतां बक्षी १९३०: ४)

५. उभयथा भावशब्दस्य अर्थः -

के. वी. अभ्यङ्कर महाभागेन 'अ डिक्शनरी अव् संस्कृत ग्रामर्' इत्यस्मिन् स्वीये ग्रन्थे भावशब्दस्य इमे अर्था उक्ताः –

१. Becoming (क्रिया*), Existence (द्रव्यम्*)

२. Activity (साध्या*) as opposed to instruments (साधनानि = कारकाणि*)

३. Completed action which is shown not by verb but by verbal derivative, noun (द्रव्यम् - कृदभिहितो भावः)[२]

इत्थम् अभ्यङ्कर महाभागेन भावशब्दस्य उभयाभिप्रायकाः अर्थाः दत्ताः लक्ष्यन्ते (दृश्यताम् अभ्यङ्कर (१९६१: २७०)। अतो वार्ष्यायणिना आचार्येण ये भावविकारा उक्तास्ते क्रियाविकारा वा द्रव्यविकारा वा इति

Scanned with CamScanner

शङ्कोत्पद्यते।

## ६. किं भावविकाराः क्रियाविकाराः?

डॉ. देवेन्द्रनाथ पाण्डेय महाभागेन स्वीयव्याख्यायां स्पष्टमुक्तम् – "भवतीति भावः, भवनं वा भावः = क्रिया। तस्य भावस्य विकारः = भावविकारः" इति। हिन्दीव्याख्यायामपि तेनोक्तम्, "छह प्रकार के क्रियाविकार होते हैं" इति (दृश्यताम् पाण्डेय २०११: ७)। निरुक्तस्य प्राचीन आङ्ग्लव्याख्याकारो लक्ष्मण सरूप महाभागो भावशब्दस्य 'becoming' इति अनुवादं सत्त्वशब्दस्य च 'being' इति अनुवादं कृत्वा ब्रूते, "According to Vārṣyāyaṇi there are six modifications of becoming..." (दृश्यतां सरूप २००२: ६, ७) इत्थं सर्वेऽपि इमे व्याख्याकारा भावविकाराः क्रियाविकारा एव इति अभिप्रयन्ति।

## ७. किं भावविकारा द्रव्यविकाराः?

क्रिया तु अमूर्ता इति यास्केनैव उक्तम्। अतस्तस्यां विकाराः कुतः सम्भवेयुः। विकारा द्रव्याश्रितक्रियाद्वारा एव सम्भवन्ति इति तु निश्चप्रचम्। किन्तु त इमे द्रव्येषु परिलक्ष्यन्ते। चन्द्रमणि विद्यालङ्कार पालिरत्न महोदयः स्वीयायां हिन्दीटीकायां स्पष्टं लिखति, "किसी उत्पन्न पदार्थ में ६ प्रकार के क्रिया-विकार होते हैं" इति (दृश्यतां पालिरत्न १९८१: १५)। अभ्यङ्कर महाभागो भावविकारशब्दं विवृण्वन् लिखति, "Six modes of Existence" (दृश्यताम् अभ्यङ्कर १९६१: २७१)। ततो द्रव्यविकारा एव इम इति इङ्गितं भवति। 'जन्मादयो विकाराः षड्भावभेदस्य योनयः' इति वाक्यपदीयकारिकां (ब्रह्मकाण्डे ३) विवृण्वन् मराठीटीकाकारो वा. बा. भागवत महाभागो लिखति, "जन्म वगैरे सहा विकार पदार्थांच्या (भाव*) वेगवेगळेपणाचीं कारणे होत"। अन्यत्रापि स लिखति, "पदार्थांच्या सहा अवस्था अस्तात" (दृश्यतां भागवत १९७२:

१५, १७)। पदार्थशब्दो द्रव्यपरक एव प्रायो भवति। मुकुन्दझा बक्षी महाभागेन इदमुच्यते, "स च पुनरुभयात्मा भावः कार्यात्मा कारणात्मा च। तयोर्यः कार्यात्मा तमधिकृत्योक्तं क्रियानिर्वर्त्यो योऽर्थः (फललक्षणः) सः क्रियैव वा भावः (अत्र क्रियते या सा क्रिया इति व्युत्पत्तिः अवगन्तव्या इति लेखकेन पादटिप्पण्याम् उक्तम्) इति। इदानीं कारणात्मा भावो निरूप्यते (षड् भावविकाराः भवन्ति.. इत्यादिना*)..." इत्यादि। अत्र 'क्रियते अनया इति क्रिया' इत्येवं करणसाधनः क्रियाशब्दः इति तेन उच्यते। (दृश्यतां बक्षी १९३०: ९)। करणव्युत्पत्त्याः स्वीकारेण क्रियायाः साधनत्वेन द्रव्यपरकः क्रियाशब्दः भवति। इत्थं भावविकारा द्रव्यविकारा एव इति फलितम्।

८. विमर्शः

भावविकाराणां सम्बन्धः क्रियाभिरपि स्यात् द्रव्यैरपि इति पूर्वत्र नैकधा प्रदर्शितम्। प्रायः तस्मादेव भर्तृहरिणा वाक्यपदीये भावविकारा यथा क्रियासमुद्देशे चर्चिताः तथा जातिसमुद्देशे अपि। अभ्यङ्करमहाभागेन स्वीये ग्रन्थे 'भावविकार'- शब्दं विवृण्वता यल्लिखितं तत् साकल्येन इत्थं वर्तते, 'kinds of verbal activity* which are described to be six in number. Six modes of existence (सत्ता - द्रव्यम्)...explained philosophically by Bhartrhari as a mere appearance of Shabdabrahman or Satta when one of its own power - the time factor is superimposed on it and as a result of that superimposition it appears as a process' (दृश्यताम् अभ्यङ्कर १९६१: २७१)। तात्पर्यं यत् शब्दब्रह्मरूपायां सत्तायाम् इमे विकारा अवास्तविका अपि भासन्ते। ते च तदा भासन्ते यदा तस्मिन् शब्दब्रह्मणि कालशक्तेरारोपः क्रियते। 'अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः। जन्मादयो विकाराः षड्भावभेदस्य योनयः॥'

(वाक्यपदीये ब्रह्मकाण्डे कारिका ३) इत्यस्य पद्यस्य स्वोपज्ञटीकायां भर्तृहरिः इत्थं लिलेख - तत्रैवमभूत् न अभूत् इति अपूर्वापरस्य भावस्य पौर्वापर्यव्यवस्थाविकल्पे सति जन्मादयः विकाराः षड् परिणामानां सत्ताविकाराणां योनय उपप्लवन्ते (= विक्षेपात् परिलक्ष्यन्ते*) (दृश्यतां भागवत १९७२: १५)। स्वोपज्ञटीकास्थविकल्पशब्दो योगशास्त्रे स्पष्टीकृतः, 'शब्दज्ञानानुपाति वस्तुशून्यो विकल्पः' (योगसूत्रम् - १.९) इत्येवम्। भावः अपूर्वापरः। किन्तु तत्र पौर्वापर्यव्यवस्थाया विकल्पो भवति। पौर्वापर्यं कालसंकल्पनास्वीकारे सति जायते। कालश्च क्रियोपाधिर्भवति। इत्थं भावः साक्षात् शब्दब्रह्मणोऽभिन्नं तत्त्वं, तत्र अनुभूयमानो विकारः क्रियारूपविकल्पमूलकः चेति फलितम्। षड्भावविकाराणां व्याख्यानारम्भे निरुक्तव्याख्याकारेण दुर्गेण उक्तम्, "स च पुनरुभयात्मा भावः। कार्यात्मा कारणात्मा च। तयोर्यः कार्यात्मा तमधिकृत्योक्तं क्रियानिर्वर्त्यो योऽर्थः स भावः क्रियैव वा भाव इति। इदानीं कारणात्मा भावो निरूप्यते। कथम्। क्रियाद्रव्ययोः स्वात्मस्थो विशेषः कार्यात्मप्रध्वस्तयोः पुरुषोपभोगसन्तानोपक्षये कार्यात्मभावातीतो येनात्मभावेन भवनमात्राभिसंबन्धिना प्रलयकालेऽवतिष्ठते सोऽत्यन्ताविनाशधर्मा आत्मा भाव इत्युच्यते" इति (दृश्यतां भड्कम्कर १९८५: ५२)। पुनश्चोक्तं, "सन्मात्रं भावलिङ्गं स्यात्" इति (दृश्यतां तत्रैव पृ. सं. ५४)। यदुक्तं यास्केन 'भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि' इति, तत्र यो भावशब्दः तस्मिन् यो भू-धातुः वर्तते तस्य पाणिनिना 'सत्तायाम्' इति अर्थो निर्दिष्टो वर्तते। सत्ता सत्त्वं चेति अनर्थान्तरम्। इत्थं सत्ता, अस्ति, भावः, भवति इत्येतेषु यः सुप्-तिङोः भेदो वर्तते स शब्दमर्यादामात्रम्। एते सर्वे समानार्थका भावविकारसन्दर्भे भावपदवाच्या एव। भर्तृहरेः कारिकाया भावर्थं स्पष्टयन् जे. एम्. शुक्लमहोदयो यदाह तदस्मिन् सन्दर्भे स्थाने एव।

Scanned with CamScanner

अन्येत्वात्मनि या सत्ता सा क्रिया कैश्चिदिष्यते।
भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः॥

(वाक्यपदीये क्रियासमुद्देशे २४)

ज. मो. शुक्ल - ... અવિચ્છિન્ન વ્યાકરણપરંપરા ભાવને ધાતુના અર્થ તરીકે જણાવે છે. સત્તા ધાત્વર્થ પણ છે અને પ્રતિપદિકાર્થ પણ છે. તેથી સત્તાને કોઈ વખત સત્તા કહે છે, તો કોઈ વખત ભાવ કહે છે. આ મતને સત્તાદ્ર્વૈત કહે છે. (दृश्यतां शुक्ल १९८४: ३५८)।

सत्ता धात्वर्थोऽपि प्रातिपदिकार्थोऽपि। सेयं सत्तैव कदाचित् भावशब्देनाभिधीयते। इदं सत्ताद्वैतमतं वर्तते इति शुक्लमहोदयस्य अभिप्राय इति।

*****

संदर्भाः

१ यथा वाक्यपदीये पदकाण्डे क्रियासमुद्देशे कारिकासंख्या २६, २८ इत्यादिषु (दृश्यतां शुक्ल १९८४: ३५९)। जातिसमुद्देशेऽपि ३५, ३६ इत्यादिकारिकासु भावविकाराणां चर्चा विहिता (दृश्यतां शुक्ल १९८४: २०४)।

२ इति चिह्निताः शब्दाः अस्य पत्रस्य लेखकेन तत्तद्ग्रन्थकर्तॄणाम् अभिप्रायस्फोटनार्थं निवेशिताः सन्ति।

ग्रन्थसूची

१. अभ्यङ्कर, का. वा., १९६१, अ डिक्श्नरी अव् संस्कृत ग्रामर, बरोडा : ओरिएन्टल इन्स्टिट्यूट.

२. जिज्ञासु, ब्रह्मदत्त, १९६४, अष्टाध्यायीभाष्यप्रथमावृत्ति [प्रथम तृतीयाध्यायात्मक प्रथम भाग], सोनिपतः रामलाल कपूर ट्रस्ट,

Scanned with CamScanner

दशमसंस्करणम्, २००८.

३. पाण्डेय, दे. ना. २०११ निरुक्तम् (प्रथमाध्यायः) जयपुर : हन्सा प्रकाशन.

४ पालिरत्न, चन्द्रमणि विद्यालङ्कार, १९८१ वेदार्थ दीपक निरुक्त भाष्य. दिल्ली : आर्ष कन्या गुरुकुल.

५ बक्षी, मुकुन्दझा १९३० श्रीमद्यास्कमुनिप्रणीतम् (काश्यपप्रजापति-कृतनिघण्टु-भाष्यरूपम्) निरुक्तं निरुक्तविवृत्त्या समुपेतम्. मुम्बयी : निर्णयसागरमुद्रणालयः.

६ भड्कम्कर, ह. म. १९८५, श्रीमद्यास्कप्रणीतं निरुक्तं निघण्टुपाठ-समुपेतं दुर्गाचार्यकृत-ऋज्वर्थाख्यवृत्या समवेतम्. पूना : भाण्डारकर-प्राच्यविद्यामन्दिरम्. [प्रथममुद्रणम् - १९१८]

७ भागवत, वा. बा. १९७२, वाक्यपदीयं स्वोपज्ञटीकासहितं मराठी-अनुवादयुक्तम्. पुणे : टिळक महाराष्ट्र विद्यापीठ.

८ शर्मा गिरिधर शर्मा परमेश्वरानन्द (सम्पा.) २००८, श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी (कृदन्तप्रभृतिसमाप्तिपर्यन्ता) श्रीवासुदेवदीक्षितप्रणीतया बालमनोरमया श्रीज्ञानेन्द्रसरस्वती वि्रचितया तत्त्वबोधिन्या च समलङ्कृता. दिल्ली : मोतिलाल बनारसीदास. [प्रथममुद्रणम् ११९७९]

९ शर्मा, नत्थुराम १९९९, श्रीपदबोधिनीनाम्नी संस्कृतटीका तथा रहस्यदीपिका गुजरातीटीका सहित श्रीपातञ्जलयोगदर्शन. बिलखा : आनन्दाश्रम. [प्रथममुद्रणं १९५३]

Scanned with CamScanner

१० शुक्ल, ज. मो. १९८४, महावैयाकरणभर्तृहरिविरचितं वाक्यपदीयं
र्जरभाषानुवादटिप्पणसहितम्. अहमदाबाद : लालाभाई दल्पतभाई
रतीय संस्कृति विद्यामन्दिर.

१ सरूप, लक्ष्मण २००२, श्रीयास्काचार्यप्रणीतं शब्दव्युत्पत्ति-
षाविज्ञानार्थविज्ञान-विषयकं निघण्टुसमन्वितं निरुक्तम्. दिल्ली :
तेलाल बनारसीदास. [प्रथमसंस्करणम् १९२०-२७]

ई-टेक्स्ट कार्दोना, जी. (टङ्कणम्) २००८, पतञ्जलिः व्याकरण -
भाष्य. (मूलं फ्रान्झ कील होन्, संस्करणम् – का. वा. अभ्यङ्कर)

काशिका, पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका न्यास-पदमञ्जरी-
बोधिनीसहिता. राष्ट्रियसंस्कृतसंस्थानम् राजीवगान्धिपरिसः,
रीद्वारा सज्जीकृता।

Scanned with CamScanner